## आढकाचितपात्रात् खोऽन्यतरस्याम् । (५३/१७१९)

आढकाचितपात्रशब्देभ्यो द्वितीयासमर्थेभ्योऽन्यतरस्यां संभवादिष्वर्थेषु खः प्रत्ययो भवति । ठञोऽपवादः । पक्षे सोऽपि भवति । आढकं संभवति अवहरति पचति वा आढकीना, आढकिकी । आचितीना, आचितिकी । पात्रीणा, पात्रिकी ॥

## द्विगोः ष्ठंश्च । (५४/१७२०)

[1]आढकाचितपात्रात् इत्येव । आढकाचितपात्रान्ताद् द्विगोः संभवत्यादिष्वर्थेषु ष्ठन् प्रत्ययो भवति, चकारात् खः[2], अन्यतरस्याम् । [3]विधानसामर्थ्यादेवानयोर्लुक् न भवति । ठञस्तु पक्षेऽनुज्ञातस्याध्यर्धपूर्वद्विगोः (५.१.२८/१६९३) इति लुग् भवत्येव । नकारः स्वरार्थः । षकारो ङीषर्थः । द्व्याढकिकी, द्व्याढकीना, द्व्याढकी (४.१.२१/४७९) । द्व्याचितिकी, द्व्याचितीना, द्व्याचिता । अपरिमाणबिस्ताचितेति (४. १. २२/४८०) ङीपः प्रतिषेधः । [4]द्विपात्रिकी, द्विपात्रीणा, द्विपात्री ॥

## कुलिजाल्लुक्खौ च । (५५/१७२१)

द्विगोः इत्येव । कुलिजशब्दान्ताद् द्विगोः संभवत्यादिष्वर्थेषु लुक्खौ भवतः । चकारात् ष्ठन् च । अन्यतरस्यांग्रहणा[5]नुवृत्त्या लुगपि विकल्प्यते । ठञः पक्षे श्रवणं भवति । तेन [6]चातूरूप्यं संपद्यते । द्वे कुलिजे संभवति अवहरति पचति वा द्विकुलिजिकी, द्विकुलिजीना, द्विकुलिजी,[7] द्वैकुलिजिकी । 'परिमाणान्तस्यासंज्ञाशाणयोः' (७.३. १७/१६८३) इत्यत्र कुलिजग्रहणमपीष्यते, तेनोत्तरपदवृद्धिरपि न भवति ॥

## सोऽस्यांशवस्नभृतयः । (५६/१७२२)

स इति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत् तत् प्रथमासमर्थम् [8]अंशवस्न-भृतयश्चेत् ता भवति । अंशो भागः । वस्नं मूल्यम् । भृतिर्वेतनम् । पञ्च [9]अंशो वस्नो वा भृतिर्वास्य पञ्चकः । सप्तकः[10] । [11]साहस्रः ॥

## तदस्य परिमाणम् । (५७/१७२३)

तत् इति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति [12]यत् प्रथमासमर्थं परिमाणं चेत् [13]तद् भवति । [14]प्रस्थः परिमाणमस्य प्रास्थिको राशिः[15] । खारशतिकः । शत्यः, शतिकः । [16]साहस्रः । द्रौणिकः । [17]कौडविकः । वर्षशतं परिमाणमस्य वार्षशतिकः । [18]वार्षसहस्रिकः । षष्टिर्जीवितपरिमाणमस्य इति षाष्टिकः । [19]साप्ततिकः ।

समर्थविभक्तिः प्रत्ययार्थश्च पूर्वसूत्रादेवानुवर्तिष्यते, [20]किमर्थं पुनरनयोरुपादानम् ? [21]पुनर्विधानार्थम् । द्वे षष्टी जीवितपरिमाणमस्य द्विषाष्टिकः[22] । द्विसाप्ततिकः । पुनर्विधानसामर्थ्याद् अध्यर्धपूर्वद्विगोर्लुक् (५. १. २८/१६९३) न भवति ॥

---

1. वाक्यमिदं नास्ति फ. 2. च इत्यधिकम् फ. 3. तत्र इत्यधिकम् फ. 4. द्विपात्रे संभवति अवहरति पचति इत्यधिकम् ग. 5. अनुवृत्तेः क. 6. चत्वारि रूपाणि भवन्ति ब. 7. ठञ्लुक् इत्यधिकम् ड. 8. अंशादि चेत् भवति क, अंशादि तत् भवति फ. 9. अंशा वत्स्ना क. 10. नवकः दशकः शत्यः शतिकः द्विकः त्रिकः इत्यधिकम् क. 11. सहस्रकः ह. 12. तत् क. फ. ह. 13. तत् नास्ति फ. 14. प्रस्थं ड. 15. द्रौणिकः इत्यधिकम् फ. ह. 16. खारीसहस्रिकः क. 17. नास्ति फ. 18. वार्षसाहस्रः फ. 19. द्विसाप्ततिकः अ.इ.ग. 20. तद् इत्यधिकम् फ. 21. अधिकविधानार्थम् ह. 22. त्रिषाष्टिकः त्रिसाप्ततिकः इत्यधिकम् ब. क. फ.